१५. अत एव संग्रहे यदुक्तम्। पिण्याकाम्लाशिनीनां तु गुर्वभिष्यंदि तद्भृशमिति तदेतेनैवोक्तप्रायत्वान्नेहोक्तम्।—५।२४

१६. आदिग्रहणात्तक्रपिंडकक्षीरशाकयोर्ग्रहणम्। वह्निनाशकत्वं चैषां बल्यत्वेन शुक्रकृत्त्वेन विष्टंभिदोषलत्वेनावगतमेवेति 'वह्निनाशना' इति ग्रंथकृता नेह कृतम्। संग्रहे तु स्पष्टार्थं कृतमेव। तत्र किलाटोऽल्पक्षीरो बहुना तक्रेण कृतः। पीयूषः सद्यःप्रसूताक्षीरकृतः। कूर्चिका दधितक्रकृता किलाटिका मोरणः क्षीरसदृशः किलाटिकः, पिंडकं उत्तरापथे प्रसिद्धम्, क्षीरशाकः प्रसिद्धः—५।४०

१७. अत एव संग्रहे सुस्पष्टं कृत्वोक्तम्। विद्याद्विधिवृत्तादीनां गुणदोषान्यथा पयः।५।४१ अतोऽस्यापीक्षुरसस्य मारुतजित्त्वं वेद्यम्॥ ग्रंथकृता तु स्पष्टं कृत्वा नोक्तम्। भुक्ते हि समीरणकृत्त्वमस्य दृष्टम्। तथा संग्रहे। वृष्यः शीतः पवनजिद्भुक्ते वातप्रकोपन इति। स्वरनादेऽप्युक्तम्। मारुताष्मानजननश्चक्षुष्यो वृंहणो रस इति।—५।४२

१८. तथा ह्ययमेव तंत्रकारः संग्रहे मधुनो भेदानाह्यत्। तथा भ्रामरं पौत्तिकं क्षौद्रं माक्षिकं तद्यथोत्तरम्।—५।५२

१९. संग्रहेऽप्युक्तम्। मेध्यस्तिलः स्पर्शशीतो मेध्यं तैलं खलो हिमः। तस्यैव श्लेष्मकर्तृत्वं न तैलस्य खलस्य चेति। पानकस्त्वायुर्वेदावतारेऽधिजगे। विपाके कटुकं तैलं वातघ्नं कफपित्तकृदिति।—५।५५

२०. तथा च संग्रहेऽधिकमप्युक्तम्। दंतीमूलकरक्षोघ्नकरंजारिष्टशिग्रुजम्।—५।६१ यदि हि शिग्रौ धान्यस्य मारुतकृत्त्वं समेयात् तदेतदुक्तं युज्यते। तस्माद्वातकृ-त्त्वमस्यास्तीति स्थितम्। तस्मिंश्च सत्यष्मानकारित्वमप्युपपन्नमेव। अत एव संग्रहेऽस्याष्मानकारित्वमुक्तम्। मुद्गादीनां च विशेषास्तत्रैवोक्ताः।

यथा—हरितास्तेष्वपि वरा मकुष्टाः कृमिकारिणः । वर्ण्याः परं प्रलेपाच्चै-मंसूरा ग्राहिणो गृञ्जमिति । ६।१६

२१. संग्रहे तु स्पष्टं कृत्वोक्तम् । ६।१८

२२. संग्रहोक्तं चाम्लपाकत्वं कषायमधुरत्वं चेह नोक्तम् । यतोऽम्लपाकित्वं विदाहित्वादेवास्योक्तम् । कषायस्वादुत्वं च शिबीधान्यसामान्यगुणकथनेनैव । कृष्णात्रेयस्त्वाह । निष्पावा मधुरा रूक्षाः सकषाया विदाहिनः । उदावर्ते प्रशस्यंते गुरवो वातपित्तला इति । ६।१९

२३. स्निग्धत्वमनिलघ्नत्वं कषायकटुतिक्तरसत्वं नानाजातित्वं चेहास्य ग्रन्थकृता लाघवान्नोक्तम् । संग्रहे तूक्तमेव ।—६।२१

२४. संग्रहे त्वेवमुक्तम् । नवं धान्यमभिष्यंदि सक्यं कैदारजं च यत् । लघु वर्षोषितं देशभूमिजं स्थलसंभवमिति । ६।२४

२५. सिद्धसारे चोक्तम् । अत्युष्णा मंडकाः पथ्याः शीतला गुरवो मता इति । ६।३९

२६. आदिशब्देन संग्रहोक्ताः खंजरीटकपारावताः गृह्यन्ते । ६।४५

२७. संग्रहे तु स्पष्टं कृत्वोक्तम् । यथा । तत्र बद्धमला रुच्या मांसानामुत्तमा हिमाः । कषायस्वादुविशदा लघवो जांगला हिताः । ६।५४

२८. मुनिना चान्येऽप्युक्ताः । न्यग्रोधोदुंबराश्वत्थप्लक्षपद्मादिपल्लवाः । कषायाः स्तम्भनाः शीता हिताः पित्तातिसारिणाम् । तथा सुश्रुते गदितम्—करीरकुसुमं ज्ञेयं कफपित्तहरं लघु । आगस्त्यं नातिशीतोष्णं नक्तांधानां प्रशस्यते । धातुर्थकज्वरहरं नस्ययोगेन शीलितम् ॥—६।८०

२९. संग्रहे त्वस्य स्वादुविपाकित्वमुक्तम् । तत्पाठे । महत्पुनः रूक्षोष्णं कटुकं स्वादु विपाके सर्वदोषकृदिति । तच्चामविषयम् ।—६।१०२

३०. मधूकबदरयोरपि विशेषांतरमुक्तं संग्रहे । मधूकजमहृद्यं तु बदरं सरणात्मकमिति ।—६।१२२

३१. संग्रहे सहकारस्य गुणा उक्ताः यथा सहकाररसो हृद्यः सुरभिः स्निग्धरोचन इति ।—६।१२६

३२. निघण्टावुक्तम् । आरुकं वीरसेनं च वीरा वीरारुकं तथा ।
विद्याज्जातिविशेषेण तच्चतुर्विधमारुकम् ॥—६।१३३

३३. कृष्णात्रेयस्त्वामलकं त्रिदोषघ्नं व्याख्यत् । यथा । अम्लभावाज्जयेद्वातं पित्तं माधुर्यशैत्यतः । कफं रूक्षकषायत्वादेवमेष त्रिदोषजित् ।—६।१५५

३४. तथा च धन्वन्तरिराख्यत् । विभीतकः कर्षफल इत्यादि । अन्वर्था हीयं संज्ञा । कर्षः कर्षप्रमाणं फलं यस्य स कर्षफल इति । तदेवं विभीतकस्य फलं यत्कर्षप्रमाणं तद्ग्राह्यमित्यवतिष्ठते । हरीतक्या अपि प्रमाणं नियतमेव । तेनांतरेऽप्युक्तम् । नवा स्निग्धा घना वृत्ता गुर्वी क्षिप्ता तथाऽम्भसि ।

निमज्जेद्वा प्रशस्तत्वाद्गुणकृत्सा प्रकीर्तिता। नवादिगुणयुक्तत्वं तथैकत्र द्विकर्षता। हरीतक्याः फले यत्र तेनैतच्छ्रेष्ठमुच्यत इति। तदेवं द्विकर्षप्रमाणत्वं हरीतक्याः स्थितम्। धात्रीफलस्यापि युक्त्या नियतप्रमाणत्वमेव। तथा चोक्तं तंत्रान्तरे। अभयैका प्रदातव्या द्वावेव तु विभीतकौ। धात्रीफलानि चत्वारि त्रिफलेयं प्रकीर्तितेति। तदेवमामलकानामर्धकर्षप्रमाणत्वमवतिष्ठते। तस्मान्नियतप्रमाणत्वं त्रिफलायाः स्थितम्।—६।१५६

३५. संग्रहे त्वधिकमुक्तम्। यथा सुवर्णं बृंहणं स्निग्धं मधुरं रसपाकयोः। विषदोषहरं शीतं सकषायं रसायनम्।—६।१६९

३६. अन्नस्य रक्षाऽन्नरक्षा सोपदेश्या यत्राध्याये सोऽप्युपचारादन्नरक्षेत्युच्यते। यथा शिशुपालवधः काव्यमिति।—७।१

३७. तस्मान्मधुमद्यदधिष्वत्युष्णं विरुद्धमित्यत्राचार्यो युक्त्या प्रत्यपादयत्। संग्रहे तु स्पष्टं कृत्वोक्तम्। मद्यमधुदधिभल्लातकेषु चोष्णमिति।—७।३६

३८. संग्रहे चातोऽधिकमप्युक्तम्। यथा। सौवीरेण तिलशष्कुली। क्षीरेण लवणम्।

३९. तथानंगम् अंगं जघनम् नांगमनंगमंगसदृशं जघनकार्यनिर्वर्तनयोग्यं मुखादिकमुच्यते। दाक्षिण्यात्या हि मुखेन कुर्वन्ति तन्निषिध्यते।—७।७१

४०. संग्रहे तु स्पष्टार्थमुक्तम्। यथा, कंठकपोलं विदहत्यन्नं प्ररोचयतीति।—१०।३

४१. संग्रहोक्तानि मध्यमान्यपराणि कर्माण्येषां संत्येव। यथा रसस्य दृष्टिरक्तपुष्ट्यादिकं कर्म।—११।४

४२. अन्ये त्वाहुः परशब्देनैतद् द्योतयति। अन्यदप्योजोऽस्ति न तद्धातूनां शुक्रांतानां तेजः श्लेष्माख्यमिति। तथा चोक्तं संग्रहे। मृदु सोमात्मकं शुद्धं रक्तमीषत्सपीतकमित्यादि। यन्नाशे यस्यौजसो नाशेऽभावे नियतं निश्चितं प्राणिनोऽभावः।—११।३८

४३. तदेव वृद्धक्षीणसमा दोषा वैद्याः। क्षीणा दोषाः क्षीणत्वादेवाकिंचित्करत्वात्कदाचित्पीडां नोत्पादयंत्येवेति विचित्यात्पमतयो वैद्याः क्षीणदोषवर्धनार्थं कदाचिदनादरं कुर्युरित्याह।—११।४४

४४. तद्विकाराश्च संग्रह उक्ताः। तथा च तदग्रंथः। अशीतिर्वातजा रोगाश्चत्वारिंशच्च पित्तजाः। विंशतिः श्लेष्मजाश्चैव स्थूला नानात्मजा मताः।—१२।५४

४५. संग्रहेऽप्यन्यदप्युक्तम्। यथा। ततो गुरूपावरणो निवाते शयने स्थितः। जरणांतं प्रतीक्षेत तृष्यन्नुष्णाल्पवारिपः।—अ० १६।२१

४६. मृदुकोष्ठे च स्नेहगो दोषः संग्रहे कथितः। यथा। चत्वार्यहानि पंच वा स्नेहं पिबेदिति। यदि च त्र्यहेण सम्यक्स्निग्धलक्षणं न स्यात्ततश्चतुर्थंचरात्रमपि स्नेहं पिबेत्। मध्यकोष्ठस्तु षड्रात्रं पिबेदित्याह। सम्यक्स्निग्धे लक्षणोत्पत्तिरेव नियमोऽतः सप्ताहादप्यूर्ध्वमच्छस्नेहः पेयो यावत्स्निग्धलक्षणं स्यात्। अतः परं स्नेहः सात्मीभवेत्। सात्मीभूते च स्नेहे यो दोषः स संग्रहे कथितः। यथा। सात्मीभूतो हि कुरुते न ग्लानामुदीरणम्। यदि तु सप्ताहेनापि स्नेहलक्षणं नोत्पद्यते तदा दिनमेकं विश्रमय्य पुनः स्नेहो योज्य इति सद्वैद्याः।—१६।२९

४७. आदिशब्देन तु बलक्षयजाड्यवाग्ग्रहादयः संग्रहोक्ताः गृह्यन्ते।—१६।३२

४८. या स्त्री सुरतव्यवहारगर्भग्रहणायोग्या अथवा बाला या अप्रौढा तस्या योनिर्मूत्रस्यैव केवलं मार्गस्तस्या नेत्रं वृषणगुलं प्रवेश्यम्। अत ऊर्ध्वं तु प्रवेशात्तासां मांसक्षतिः स्यात्।—१९।७९

४९. ननु कुठारिकाविषये कथं व्रीहिवक्त्रस्य प्रयोगः। यतोऽपवादविषयं परिहृत्योत्सर्गाः प्रवर्तन्त इति न्यायः। व्रीहिवक्त्रस्यैव सामान्येन प्रयोगोऽनुज्ञातः। तथा चाह। व्रीहिवक्त्रं प्रयोज्यं वा तत्सिरोदरयोर्व्यधे इति। कुठार्याः पुनर्विशेषोऽभिहितः। तयोर्ध्वदंडया विध्येदुपर्यस्थ्नां स्थितां सिरामिति। तस्माद्युक्तमेतत्। अत्रोच्यते। ज्ञापकं कुठारिकाविषये व्रीहिवक्त्रस्य प्रयोगो न्याय्य एव। यदयमाचार्यो वक्ष्यति। मांसले निक्षिपेद्देशे व्रीह्यास्यं व्रीहिमात्रकमिति। अनेन हि वचनेन ग्रंथकार इदं प्रत्यपादयत्। बहुमांसे शरीरावयवे व्रीहिमुखं व्रीहिमात्रं निक्षेप्यम्। अन्यत्र स्वाशयानुरोधेन व्रीहिवक्त्रस्य प्रयोगः कार्य इति। अनेनैवाभिप्रायेण शास्त्रकृता प्रमाणपरिमाणाभ्यां संख्यायाश्चापि विषये मात्रच् वक्तव्य इत्यनेन मात्रच् कृतः। अन्यथा तु स्पष्टं कृत्वा व्रीहिप्रमाणं व्रीह्यास्यं मांसले निक्षिपेद्व्यध इति पाठं कुर्यात्। तस्माद्युक्तो व्रीहिमुखस्य कुठारिकाविषयेऽपि प्रयोग इति।—२७।२४

शारीरस्थान

५०. अत एवायमेव तन्त्रकारोऽन्यथा संग्रहे जगाद।—१।८

५१. गर्भस्य सन्निवेशोऽपि संग्रहे प्रोक्तो यथा। गर्भस्तु मातृपृष्ठाभिमुखो ललाटे कृतांजलिः संकुचितांगो गर्भकोष्ठे दक्षिणं पार्श्वमाश्रित्यावतिष्ठते पुमान् वामं स्त्री मध्यं नपुंसकम्। तत्र स्थितश्च गर्भो मातरि स्वपत्यां स्वपिति प्रबुद्धायां प्रबुध्यत इति।—१।६६

५२. आयुर्वेदावतारे तूक्तम्। शीतोष्णशमवृद्ध्याप्यं न पित्तं द्रुतता मतम्। करकाभः कफो भौमो नानिलानलसंहत इति।—३।७–८,

५३. तथा चाष्टांगसंग्रहेऽप्यधीतम् । तत्राहाररसो व्यानेविक्षिप्तो यथास्वं सप्तसु धात्वग्निषु क्रमात्पच्यमानः स्वात्मभावप्रच्युतिसमनंतरमेव प्राप्तरक्तादिसंज्ञः कालवदस्खलितबलप्रमाणो देहमूर्जयित्वेत्यादि । तथा चरकसंहितायां दृढबलोऽप्याह । रसाद्रक्तं ततो मासं मांसान्मेदस्ततोऽस्थि च । अस्थ्नो मज्जा ततः शुक्रं शुक्राद्गर्भः प्रसादजः ॥—३।६२

५४. समुदायेषु हि प्रकृताः शब्दा अवयवेष्वपि वर्तन्ते इति नकुलशब्दोऽत्र नकुललोचनविषयो वेद्यः । यथा च नागानन्दनाटके । चक्षुस्तामरसानुकारि हरिणा वक्षःस्थलं स्पर्धते इति । अत्र हि हरिवक्षसा यस्य स्पर्धते वक्षःस्थलमित्ययमर्थो वेद्यः । अथवा नकुललोचनयो उपमा ययोस्ते नकुलोपमे इत्यत्र मध्यमपदलोपी समासः ।—५।८

निदानस्थान

५५. संग्रहे तु जगाद । उभयार्थकारि पुनर्वैद्यव्यपाश्रयं तथा छर्दी छर्दनमित्यादि । एवंविधं ह्यविपरीतमेव भेषजं विपरीतमर्थं करोतीति । १।६

५६. तथा चाष्टांगसंग्रहे शोषनिदाने वक्ष्यति । योंऽशः शरीरसंधीनाविशति तेन जृंभा ज्वरश्चोपजायत इत्यादि । २।२०—

५७. संग्रहे च रसादिधातुस्थज्वरलक्षणमुक्तम् । यथा उत्क्लेशो गौरवं दैन्यं भंगोऽङ्गानां विजृंभणम् । अरोचको वमिः सादः सर्वस्मिन् रसगे ज्वरे । —२।७५

५८. संग्रहे च नक्षत्रसमाश्रयेण च साध्यासाध्यज्वरलक्षणमुक्तम् । यथा आधानजन्मनिधनप्रत्वराख्यविपत्करे । नक्षत्रे व्याधिरुत्पन्नः क्लेशाय मरणाय वा । —२।७९

चिकित्सास्थान

५९. अन्ये त्वाहुः । क्रमान्मरुत्पित्तकफाः सर्वत्र सत्त्वे बले । वातादीनां यथापूर्वं यतः स्वाभाविकं बलम् ॥ऊचे पराशरोप्यर्थममुमेव प्रमाणयन् । यथोपन्यासतः प्राप्तमादौ दोषभिषग्जितम् । नेतृभंगेन दृष्टो हि समं सैन्यपराजय इति । —१।१४६

६०. तृद्वृता शुक्लगोपीत्युच्यते । श्यामा मालविका तृवृदुच्यते । तयोः कषायेण तथा कल्केन तयोरेव मात्रामाश्रित्यैतदुक्तमत्र कंटकारिकालेहवत्क्वाथकल्कशर्कराणां परिमाणं वेद्यमिति वृद्धवैद्यव्यवहारः । २।८—

६१. तथा चोक्तम् । सप्तलाशंखिनीदंतीद्रवंतीगिरिकर्णिकाः । त्रिवृच्छ्यामोदकीर्यौ च प्रकीर्या क्षीरिणी तथा । छगलांडी गवाक्षी च कुवाक्षी गिरिकर्णिका । मूसरदिदला चैव भवेन्मूलविरेचनमिति । ६।५६—

६२. भाष्यकारस्त्वाह द्वंद्वात्परो यः श्रूयते स सर्वैः संबध्यत इति । तेन दीपनग्राहिशब्दयोरपि भावप्रत्ययार्थसंबंधो भवतीति । १०।५—

६३. तथाऽन्यत्रैव तन्त्रकृदष्टांगावतारेऽप्यगीष्ट—दशमूलाम्भसा सिद्धैर्व्योषक्षार-रजोन्वितैः···क्षौद्रतप्तैर्लकैरपि ।—१७।१९

कल्पस्थान

६४. उच्चटा क्षुरकी इति कोंकणे प्रसिद्धा ।—४।४२

६५. हरणात् सर्वरोगाणां—स्रा प्रशस्यते । इति वृद्धवाग्भटात् ।—३९।१४

६६. आमाम्बुपानेक्षुविकारमत्स्य—स वर्जनीयः इति वृद्धवाग्भटात् ।—३९।१२९

उत्तरस्थान

६७. अतएव संग्रहे जगाद । ज्वरी ज्वरघ्नांबुदपर्पटादिक्वाथेन रक्ती मधुयष्टि-काया: ।

६८. गिरिजं चतुर्गुणजलं क्वाथ्यं स्याद्भावनौषधं तत्र । चतुर्थशेषे क्वाथे पूतोष्णे प्रक्षिपेद्गिरिजमिति । अत्र चतुर्गुणजलस्यौषधस्य क्वाथेन मुक्तरसा न तथा स्यादिति वाग्भटोक्तमेवाष्टगुणजलक्वाथेन कार्यमिति मन्यामहे । —३९।१५३

६९. संग्रहे च गुग्गुलुकल्पो विहितः ।—३६।१४३

७०. ननु संग्रहेणैव महामुनिमतं संग्रहीतम् । तत्किमनेनेत्याह । महासागर इव गंभीरो यः संग्रहाख्यस्तस्योपलक्षणमुपायभूतमेतत् । तस्मात्पृथगेतत् तंत्रमुदितम् । अष्टावंगानि यस्य तदेवाष्टांगम् तद्वैद्यकं च तदेव महोदधिरष्टांगवैद्यकमहोदधिस्तस्य मंथनमिव मंथनं पाठश्रवणचिंतनादिभिर्विक्षोभणात् । तेन कारणभूतेन योऽष्टांगसंग्रह एव महानमृतराशिराप्तस्तस्मादष्टांगसंग्रहमहामृतराशेः सकाशात् पृथगेतत्तंत्रमुदितम्—४०।८१

५ इन्दु (१३ वीं शती)

(अष्टांगसंग्रह-व्याख्या)

सूत्रस्थान

१. प्रोद्भासिस्वच्छशंखस्फुटशशिकलोद्दामवैशद्यहृद्यप्रोद्यत्सौन्दर्यवर्यप्रकटितवपुषश्रौमि वागीश्वरीं ताम् । कल्लोलोल्लासशान्तिप्रततसिततरक्षीरसिन्धूदन्तरालश्लिष्यत्पीयूषरेखां स्मरयति विबुधान्यायतो या दयालुः ॥ सरसि सुविपुलायुर्वेदरूपेकृतास्थं मुनिवरवचनौघे दीर्घनाले निबद्धम् । रचितदलमिवांगैः संग्रहाख्यं सरोजं विकसति शशिलेखाख्याख्येनेन्दोर्यशोवत् ॥ (मंगलाचरण)

२. दुर्व्याख्याविषसुप्तस्य वाहटस्यास्मदुक्तयः । सन्तु संविन्निदायिन्यः सदागमपरिष्कृताः ।—अ० १

३. सोऽयं वाहटनामा शास्त्रकारो लोकहिताय शास्त्रमारिप्सुः विघ्नोपशमायाभिमतदेवतानमस्कारं करोति ।"

४. वाहटेन दर्शयता मधुशब्दप्रयोगः कृतः ।"

५ तत् वाहट एकीकुर्वन् आह ।"

६. परतन्त्रविरोधो यथा—चरकग्रन्थेन कृष्णात्रेयो विरुद्धः । तथा चरको हिमवत्-प्रभवानां नदीनां पथ्यत्वमिच्छति । कृष्णात्रेयसुश्रुतौ तासामेव गलगंडादिकर्तृत्वम् । वाहटस्तूपलास्फालनेत्यादिना विरोधं निवर्तयति ।।"

७. अप्सदृशो मेदसो भागो वसा । तथा च शुद्धमांसस्य यः स्नेहः सा वसा परिकीर्तिता इति चरकः । अ० ३

८. हंसोदकमिति नाम चरक (सू०अ०६।४६) आह ।—अ० ४

९. गुणशब्दश्च भाष्यपर्यायः (पा०सू०—५—२।४७ काशिका)—अ०६

१०. प्राच्याः गौड़ाः । अवन्तयो मालवाः । अपरान्ताः कोंकणाः ।"

११. पर्णीमूलमेरकामूलम् । एरका कश्मीरेषु पिप्पली अन्यत्र दन्तेरकमट्टेरकभेदेन प्रसिद्धा ।"

१२ उक्तं च हृदये—परस्परोपसंस्तम्भाद्धातुस्नेहपरम्परा—(सू० ३—६५)। —अ० ७

१३. मुंजातः काश्मीरेषु महोपकः ।"

१४. कशेरुकं प्रसिद्धं मध्यदेशे । क्रौंचादनं काश्मीरेषु केबुकमन्यत्र कनाविकम् ।"

१५. प्रायोग्रहणमेतेषां मध्ये केचिन्नैवंस्वरूपा इति ज्ञापनार्थम् । तेषां च पर्याया निघण्टुज्ञानात् देशभाषासंस्करणाच्च किंचित् ज्ञायन्ते । माषः गान्धारीकाश्मीरेषु क्षिलः । क्षोणिका काश्मीरेषु लोनारा यवशाकः क्षारपत्रकम्—काश्मीरेषु कोणीकः ।"

१६. तथा च बालमूलकस्य कन्दमूलकबीजदेशकालसंस्थानपरिणतिविशेषाद् भिन्नजातीयत्वं प्रसिद्धमेव काश्मीरेषु ।"

१६ उपदंशो येन सहान्नं भोक्तुं युज्यते । जम्बीरः क्षारपत्रः काश्मीरेषु तुम्बुरुः ।"

१८. अत्र शाकानां हरिद्वकानां च येषां नामानि नोक्तानि तेषां देशभाषादिविद्भ्योऽधिगम्यापभ्रंशसंस्कारादुपयोगविशेषाच्च ज्ञातव्यानि ।"

१९. सिंचती-काश्मीरेषु वृक्षवदरी ।"

२०. राजधान्यां प्राच्यां उदीच्यां वा दिशि गुप्तं क्षेत्रगृहं इष्यते । अ० ८

२१. कौटिल्ये प्रसिद्धाः (सुदाः) ।"

२२, क्षेमकुतूहले (सुवाच्यकः) ।"

२३. ये हि मध्यदेशादौ वृक्षाः प्रसिद्धाः ।"

२४. एतच्चास्मद्गुरवो यथाप्रक्रान्तशब्दार्थपरतन्त्रास्तत्रैवेति न तद्विरुद्धानि परामृशन्तो वचनादिवत् पूर्वं देहस्यादिसंस्कारेऽपि वैद्यविधेयतामभिमन्यमानाश्चरकस्य बोद्धारो व्याचक्षाणमभिमन्यन्ते । अदृष्टारकेषु तु तथादिषैर्वा

द्रव्यैः पूर्वमभिसंस्कारः शरीरस्य इत्यस्य वाक्यस्य व्याध्युत्पत्त्यनैकान्तिक-प्रदर्शनपरत्वमंगीकृत्य तथाविधैरिति च विरुद्धसमानि परामृश्य विरुद्धैरेव पूर्वसंस्कारो व्याध्यनुत्पत्तिहेतुरिति सात्म्याहारप्रायतया द्वितीयोऽपि पक्षो य उद्भासितः स्रोऽस्माभिरुपेक्षित एव । अ० ९

२५. समुदाये तु खंडकूष्माण्डकादौ विद्यते । अ० १३

२६. अत उच्यते तिक्तकषायौ पित्तहराविति अस्माभिरतः पराशरमतमचतुरस्र-मिव । अनन्तरं बाहटो यन्मुधरं इत्यादिना प्रकृतं प्रस्तौति ।"

२७. वृद्धमूलकस्य त्रिदोषकर्तृ: कटुकस्य कफकर्तृत्वे यदाचार्यबाहटेन मधुरविपा-कित्वं कारणमुक्तं तत्स्वयं हृदयपठितस्यैव वृद्धमूलकस्य कटुविपाकित्वं स्मृतं किं वान्यत् किंचिदिति न जाने ।"

२८. आचार्यकपिलबलस्त्वेषां रसस्वरूपेणैव निर्दिदेश । सुश्रुतः कपिलबलमतमेव विशेषयति ।—अ० २०

२९. ब्राह्मणप्रयुक्ताभिः वेदविहिताभिराशीर्भिरभिमंत्रिताम्,ब्रह्मेत्यादिर्वेदवादिमंत्रः, ऊं नमः इत्यादि सौगतः ।—अ० २७

३०. तथा च वैद्येषां संहितायां स्कन्दरक्षितसंस्कृतायां पठ्यते ।

३१. तच्च रक्तं केचिदाचार्या दोषमित्याहुर्धन्वन्तरीयादयः—तथान्ये चरकादयः तद्रक्तं दूष्यमित्याहुः ।—अ० ३६

शारीरस्थान

३२. तथा चाचार्य एव हृदये केवलं महत्याः प्रतिषेधं करोति । अ० ३

३३. इत्यनेन प्रकारेण पृथिव्यादिविकारसमुदायात्मकं देहमाहुराचार्याः । यथाह भगवान् चरकः ।—अ० ५

३४. इहायुर्वेदे उभयेषामाचार्याणां भिन्नदर्शनम् । एकेषामन्तरग्निपक्वान्नसारात् क्रमेण धातुपरिपोषोऽन्येषां यौगपद्येनेति ।—अ० ६

३५. प्रभावः सर्वातिशायिनी शक्तिः । एकाहः षड्रात्रमासभेदेन मतत्रये स्थिते प्रभावादेव बाहटः सर्वशास्त्रसिद्धान्तं दर्शयति प्राय इत्यादिना । न केवलं वृष्यादि यावदन्यदपि भेषजं प्रायः अहोरात्रादेव कर्म करोति ।"

३६. जात्या यथा—ब्राह्मणो मधुरप्रायाहारुचिरसाहसिको बहुलभीतिः शस्त्राद्यस-हत्वादियुक्तो भवति ।—अ० ८

"केचित् पुनः प्रख्येऽपि ग्रीष्मसमये तप्तांगाराधिकतरप्लोषदायिनस्तीक्ष्णदीधिति-पादानपि कालवद्गुणकलापानिवाभिमन्यन्ते ।" "

३७. जातिः ब्राह्मणादिका ।—अ० १२

३८. चत्वार आश्रमाः ब्रह्मचारी गृहस्थो यतिर्वानप्रस्थ इति पाषण्डाः लिंगिनः ।"

३९. आम्रप्रविडौ दाक्षिणात्यजनपदनामनी ।"

निदानस्थान

४०. येन हृदये पठति—तदेव व्यक्ततां यातं रूपमित्यभिधीयते इति। एवं च स्थिते सपूर्वरूपाः कफपित्तमेहाः इति यदा हृदयग्रन्थे व्याख्यायते तत्रैव चोदाहरिष्यामः। अ० १

४१. अध्यशनादीनां लक्षणान्युक्तानि—(अ० हृ० ८।३३-३४)।"

४२ एतदेव हृदि कृत्वा भट्टारहरिचन्द्रेण वा शब्दस्य निर्दिष्टस्याप्राधान्यं लंघनस्या प्राधान्यं व्याख्यातं··· तच्च भिषक्शास्त्रनिष्णाता नांगीकुर्वन्ति।—अ० २

४३. मणिकोऽलिंजरास्थो जलाधारः—अ० ९

४४. आचार्या (चरकाचार्याः) इदं छिद्रोदरं नाम्ना आहुः। अपरे आचार्याः (सुश्रुताचार्याः) छिद्रोदरस्यैव परिस्रावीति नाम मन्यन्ते।—अ० १२

चिकित्सास्थान

४५. तथाऽऽचार्येणैव युक्तया संपन्ने हृदये कथितम्। अ० ५

४६. क्षीरशुक्ला क्षीरविदारीत्युच्यते। "अन्या क्षीरविदारी स्यादिक्षुगंधेक्षुवल्ल्यपि। क्षीरबल्ली क्षीरमन्दा क्षीरवृक्षा पलाशिनी। इति पठन्ति।"

४७. बालस्थविरं—बोलवृक्षः शकदेशे मुण्डिकेति प्रसिद्धा (भूकदंबकः)।"

४८. कुलहलोऽलम्बुसो भूमिकन्दबकः कुटकदेशे मुण्डिकेति प्रसिद्धः।—अ० ७

४९. अलिंजराः मणिका. महामृन्मयाः जलाधाराः।—अ० ९

५०. गण्डीरो महान् कन्दप्रायः कार्तिकेयपुरादौ गिरिराजभूमिषु प्रसिद्धः। चरकपाठे तु गंडीरादिकं पिष्ट्वा कषाये विनयेत्।—अ० १०

५१. वसुकः बुकः काश्मीरे मुसूरः। वसिरः पार्वतेयः। भल्लुकः सल्लको फल्गुर्बुतको जम्बुको मतः।—अ० १३

५२. कम्पिल्लको रंजनको रेवको रक्तचूर्णकः।—अ० १४

५३. उपदिशतीत्थंनेनाचार्योऽनादरेणागमं प्रदर्शयति। अनादरकारणं च मूत्राणां तीक्ष्णत्वात् पाकहेतुत्वम्। हृदये तु इति पाठः—क्षीरिवृक्षाम्बु पानाय वस्तमूत्रं च शस्यते।"

५४. शाणं कर्षस्य चतुर्थांशः। हृदये तु तथा चरकसंवादेन पठितम् तथा त्रायमाणायाः शाणमापतति, पटोलमूलस्य कर्षो मसूरस्यार्धपलमिति। तत्र पठ्यते-त्रायन्ती त्रिफला निम्बकटुकामधुकं समम्।—अ० १५

५५. एवं च क्वाथस्य घृतादद्विगुणत्वमौषधाच्च जलस्य षोडशगुणत्वं हृदयविरुद्धमुक्तमिव। यदा हृदयपाठेकरूपतया व्याख्यायते तदा प्रस्थश्चासौ क्वाथः प्रस्थक्वाथः स च त्रायमाणाया इति ज्ञायते। किं तु तद्विरुद्धम्।···तथा च तत्रैवं पठितम्-कुडवं त्रायमाणायाः साध्यमष्टगुणेऽम्भसि·····अस्य पक्षस्य चरकेण साहचर्यं केवलम्।"

५६. झरसी—(नि०)—कपित्थपर्णा झरसी निर्ज्वरा तुम्बपत्रिका। नक्राहिदंष्ट्रिका काली वृश्चिकाल्युष्ट्रधूमकः ॥—अ० १७

५७. वृक्षादनी (नि०) वन्दाकः स्याद् वृक्षरुहा सैवारो कामरूपकः। वृक्षादनी वटरुहा कामिन्यारोहणी च सा ॥"

५८. (नि०) "पारिजातश्च रोहीतः प्लीहघ्नो रक्तपुष्पकः ॥'

५९. गंडीरो महान् द्रुमप्रायः कार्तिकेयपुराद्रौ गिरिराजुमभिप्रसिद्धः। सुधेत्यन्ये। —अ० १८

६०. (नि०) अरेणुका राजपुत्री रमणिकपिला द्विजा। कपिलोत्ता पाण्डुपत्री —अ० १९

६१. धामार्गवः कोशफला राजकोशातकी तथा। कटुकोशातकी ज्ञेया—॥"

६२. हस्तिकर्णः रक्तैरण्डः, नि०—नलिका विद्रुमलता कपोतचरणा नली।"

६३. नाकुली सर्वसुगन्धा, नि०—जयन्त्यावतिकापत्रा जयनासासुराजिता।"

६४. (नि०)—गुष्टिविष्वक्सेनकान्ता वाराही वरमालिका।—अ०२०

६५. मेषशृंगी अजशृंगी, सप्तच्छदो गुच्छपुष्पः प्रसिद्धः। द्वे सारिवे वल्लीसारिवा काष्ठसारिवा च। बृहतीद्वयं स्थूला सूक्ष्मा च। अ० २१

६६. नि०—अंकोटोऽमोलको रेची विदिष्टो दीर्घकीलकः। नि०—उच्चटा सोमपर्णी च प्रचला तलला तथा।"

६७. केवुकं प्रसिद्धं मध्यदेशे। (नि०) वितिक्ता स्याच्छखिनी तु व्रणपाडा विसर्पिणी।"

६८. तुवराणां पञ्चिमोदधितश्च प्रसिद्धानां फलविशेषणाम्।"

६९. गर्भबालयोर्वतिन शुष्यतोःशुक्लसमन्वयोऽपि हृदि स्फुरत्याचार्यस्य। अ० २३

७०, रथकारचुल्ली रथकारो नाम जातिविशेषो वर्णत्रयादूनो लोहकारवृत्तिर्गुर्जरदेशप्रसिद्धः। तस्य चुल्ली अग्निकर्मस्थानम्।"

७१. तंत्रकृता च मतिवैभवादस्य नामविशिष्टं कृत्वा कथितम्।"

७२. अत एव मुनिनाऽत्र व्योषशब्दः निर्दिष्टः।"

७३. नि०—मृत्तिका यवनो वल्को पिण्डितः श्रीनिवासकः। (नि०)—कुटजटं प्लवं धान्यं वितुन्नं परिपेलवम्।"

७४. शंखपुष्पी काश्मीरेषु बीरटीति प्रसिद्धा। अ० २४

कल्पस्थान

७५. बिम्बी रक्तफला तुण्डी तुण्डिकेरफला च सा। क्षणपुष्पी बृहत्पुष्पी सा चोक्ता क्षणघंटिका।—अ० १

७६. कटुकालाबुनी तुम्बी लम्बा पिण्डफला तथा।"

७७. कर्णिकारो राजवृक्षः प्रग्रहः कृतमालकः।—अ० २

७८. लोध्रः शावरकस्तिल्वः तिल्वकस्तिलकस्तथा।"

७९. स्नुहिः सुषा महावृक्षो गुडा निर्लिशत्रकः ।"

८०. यवतिक्ता शंखिनी च दृढपादा विसर्पिणी ।—सातला सप्तला सारी विदुला विमलाऽमला ।"

८१. दन्ती शीघ्रा निकुम्भा स्यादुपचित्रा मुकुलकः ।"

८२. चूड़ामणिः शीतपाकी शिखण्डी कृष्णला लता ।—अ० ४

८३. जीमूतको देवदाडस्तिक्तकोशा गरागरी ।"

८४. अत्र वृद्धवैद्यानुस्मरणाविच्छेद एवाचार्येणागमत्वेनोपनिबद्धः । न चानिबद्धपूर्वमागममाचार्यस्य प्रदर्शयितुं युक्तमित्याशंक्याचार्येण यस्माद् वृद्धवैद्यानुस्मर्यमाणं आचार्यचरकोक्तं लिंगं अनुमापकं विद्यते । तथा चरके वातशोणितचिकित्सिते पठिता अतोऽनुमीयतेऽन्यत्राप्येवमिति । पारम्पर्याविच्छेदस्य चागमत्वं अप्रतिहतमिति सर्वशास्त्रेषु गृहीतम् एव । अ० ८

८५. तथा च पठन्ति—निर्देशस्याविशेषेऽपि विशेषो रूढिमागतः । अविच्छेदात् प्रवक्तृणां श्रोतृणां च क्रियाविधौ । कर्मण्यगुविशेषेऽपि विशेषे लक्षणं स्थितम् । आदित्यं पश्यतीत्यत्र नाविशेषात् प्रयुज्यते ।"

८६. तथा च कश्चित्तन्त्रकारः पठति—

वचनाच्च सदा कार्यं फलमूलादि यत् स्मृतम् । भिषगव्यंजिते द्रव्ये मूलं दद्याद् विशेषतः । व्यक्तेरनुपलब्धौ तु मूलमेव प्रदापयेत् । मूलवीर्या हि भूयिष्ठ मोषधीः परिचक्षते । मूलाभावे तु दातव्यं मूलतुल्यगुणं च यत् ॥"

८७. दक्षिणो भूभागो विन्ध्य उत्तरो हिमवान् ।"

उत्तरस्थान

८८. शंखपुष्पी काश्मीरेषु वीरटिः । अ० १

८९. (नि०) आदारी काकहन्तालो तोया खदिरवल्ल्यपि ।"

९०. द्वे विद्ये एका लघुमायूरी सप्तशती द्वितीया महामायूरी चतुःसाहस्री, आर्याशब्दः प्रजावाची । रक्तकेतुनाम्ना विशिष्टा धारिणीति स्त्रीगतादीनां या प्रसिद्धा ।।"

९१. (नि०) गवादनी क्षुद्रफला वृषपादी गवाक्ष्यपि ।।—अ० २

९२. स्फुटरोदिका लज्जालुका प्रसिद्धा दाक्षिणात्येषु ।"

९३. (नि०) लक्ष्मणा पुत्रजननी रक्तबिन्दुच्छदा तथा ।—अ० ४

९४. कुकुटी मेकवाटिके प्रसिद्धा रसायनाध्यायोक्तलक्षणा ।।—अ० ६

९५. पाशिकाख्यो वृक्षः प्रसिद्धो दाक्षिणात्येषु ।"

९६. (नि०) आम्लानकस्तु कोरण्डो राजसैरेयसंज्ञकः ।—अ० १४

९७. साऽम्लविदग्धेति नाम्ना स्मृता आचार्यैः ।—अ० १५

९८. सोहला दन्तिकर्णी क्षेमा क्षेमाफलाजिता ।—अ० १६

९९. सैर्यकस्य सहचरस्य पुष्पमाम्लायनस्येति केचित्-"सुनिषण्णकनामानूपे भवति। काश्मीरेषु सुल्येति प्रसिद्धः। पत्तूरो जले भवति नाम्ना मत्स्याक्षकः।अ० २०

१०० काला नीलिनी। (नि०) नीलिन्युक्ता नीलिका नीलपत्री नीला नीली नीलयष्टी विषघ्नी। चाण्डाल्यान्याराजनी भारवाही काला काली चास्पृशा शोधनी च ॥ "एकैषीका महादूर्वा त्रिवृद्वा" ।अ० २३

१०१ (नि०) मदनं राढः पिण्डी करघाटः शत्यकः फलं जगदुः।—अ० २६

१०२ ((नि०) श्रीवेष्टको वायसिकः श्रीवासश्चेति शब्दितः।—अ० ३०

१०३ काळेयकं दार्वी (नि०) कालेयकं दारुनिशा दार्वी पीतद्रु पीतनः।

१०४. अंकोलः प्रसिद्धो मालवादिषु वेतसाकारपत्रः सकण्टकः।—अ० ३५

१०५. अश्वखुरः कृष्णशंखपुष्पी, (नि०) गिरिकर्ण्यपरा नीला वाजिखुरा व्यक्तगन्धकुसुमा च। अश्वखुरा तुरगखुरप्रतिमा स्यात् शंखिनी कृष्णा ॥"

१०६. अपद्रव्याणि लोहादिमयानि दाक्षिणात्यासु प्रसिद्धानि।—अ० ३८

१०७. (अम्बष्ठा दक्षिणापथे प्रसिद्धैव, माचीकमुत्तरापथे प्रसिद्धमेव)—अ० ३९

१०८. बूक उरुबूक आदिलोपात् एरण्डः पुल्लासः उत्तरापथे।"

१०९. सर्वाणि पठितापठितानि विषाश्रयाणि प्रसिध्यैव भारतदेशेषु ज्ञायन्ते। अ० ४०

११०. (नि०) सुरसा च सुपत्रा च बहुपत्री च तक्रला।"

१११. सुराला (नि०) सुलक्षणा सुरालाख्या ज्ञेया पुत्रवती परा। प्रजावृद्धिकरी ज्ञेया पुत्रपुष्पफलैः शुभा ॥"

११२ पावकी (नि०) क्षुरधारा पावकाख्या ज्ञेया सस्यवतीति च। वीरिणी वीरणुच्छोक्ता सैवारुणवचा मता ॥"

११३. सर्प (नि०) सर्पमंजरिसंज्ञाया केसरी तु समंजरी।"

११४. वेताली (नि०) वेताली तालवर्णी च ताली च परिकीर्तिता।"

११५. द्विजचिह्नं यज्ञोपवीतादि ब्राह्मणचिह्नम्।—अ० ४१

११६ सल्लकी झिंझिणीजम्बूभवशल्मलिकः त्वचः। पंचवल्कलसंज्ञोऽयं मुनिभिः परिकीर्तितः॥ अ० ४२

११७. कर्कैतनं पद्मरागविशेष इति जर्जटः॥

११८. महासुगन्धा रास्ना, गन्धनाकुली (नि०) सूक्ष्मपत्रा परा ज्ञेया सर्पाक्षी गंधनाकुली। अ० ४५

११९. तापी मध्यदेशप्रसिद्धा। अ० ४९

१२०. पारदं शिलाजतुताप्याभ्यां मर्दितुं योग्यो भवति।"

१२१. (नि०) अध्यण्डेक्षुरकस्तैलकण्टकः कोकिलाक्षकः। अ० ५०

१२२. उच्चटा प्रसिद्धा महामुरता श्वेतदुर्वारिका इति स्वल्पविटपः प्रायशो नदीतीरे दृश्यते इति सुश्रुतटीका, चूडालाचक्रलोच्चटा इत्यमरः।"

१२३. यथा मार्गाख्यमार्यसत्यमभ्यस्यतः चत्वार्यार्यसत्यानि दुःखं समुदायो निरोधो मार्ग इत्येति सौगतप्रसिद्धलक्षणानि ।"

१२४. यद्यपि भट्टारकप्रस्थानेन च परिप्रश्नव्याकरणव्युत्क्रान्ताभिधानहेत्वाख्याश्रतस्रोऽवशिष्यन्ते तथापि ता आचार्येण तन्त्रेऽनिबद्धा इत्यत्र नोच्यन्ते ।अथवा उक्तास्वेवान्तर्भाव्या । अथवा तन्त्रयुक्तित्वेमेव तासां नांगीक्रियते । तत्र-चाग्न्यतियोगोक्तौ वातादिविशेषेणावस्थानं संभवप्रसादाल्लभ्यमेवमाद्युक्तम् ।।"

१२५. एताश्च युक्तयो वाक्यन्यायोदधेरसंख्यप्रकारसंभविनो गेयस्येव जातयः सारं गृहीत्वा एवं व्यवस्थिताः । पदार्थयोजनास्तु व्युत्पन्नानां प्रसिद्धा एवेत्यत आचार्येण नोक्ताः । तासु च तत्र भवतो हरेः श्लोकौ-संसर्गो विप्रयोगश्च साहचर्यं विरोधिता··· विशेषस्मृतिहेतवः ।"

१२६. इतीन्दुविरचितायामष्टांगसंग्रहव्याख्यायां शशिलेखाख्यायामुत्तरे पंचाशोऽध्यायः ।।

इन्दु (अष्टांगहृदय-व्याख्या)

सूत्रस्थान

वन्दे शरीरं गिरिजासमेतं कैलासशैलेन्द्रगुहागृहस्थम् । अंके निषण्णेन विनायकेन स्कन्देन चात्यन्तसुरवायमानम् ।।—अ०८

१. चरकस्य बोद्धारो व्याख्यानमन्यथामन्यन्ते-भट्टारकेन तु तथाविधैर्द्रव्यैः पूर्वं अभिसंस्कारः शरीरस्येति अस्य वाक्यस्य व्याध्युत्पत्ति अनैकान्तिकं च प्रदर्शनपरत्वमंगीकृत्य तथाविधैरिति च विरुद्धसमानि च परामृश्य विरुद्धैरेव पूर्वसंस्कारो व्याध्युत्पत्तिहेतुरिति संज्ञा, हारप्रबलतया द्वितीयः पक्षो य उद्भासितः सोऽस्माभिरुपेक्षित एव ।—अ०८

२. अन्ये पुनरन्यथा वर्णयन्ति ।"

३. तथा च शास्त्रकृद्भिरेव—इष्टा, अन्ये पुनरन्यथा वर्णयन्ति ।"

४. बालोऽसंपूर्णधातुषोडशवर्षादयः वृद्धः सप्ततेरूर्ध्वं मैथुनं त्यजेत् ।"

५. अथेति मंगले चरकशैलिनी ।"

"इन्दुविरचितायां अष्टांगहृदयव्याख्यायां शशिलेखायां अष्टमोऽध्यायः समाप्तः ।"

६. आचार्याः गुरुस्निग्धादिकं वीर्यं चरकस्तु बहुविधमन्ये द्विविधमिति । चरक इत्यादिना बहुवीर्यवादिनां पक्षमाह ।—अ०९

७. बहुवीर्यवादिमतेन चरकाचार्येण नानाविधशक्तित्वात् द्रव्यस्य बहुवीर्यवादिता।"

८. दुष्टं रसमाममित्याचार्याः प्रचक्षते, अन्ये पुनराचार्याः अन्यथासंभवं वर्णयन्ति ।—अ०१३

९. अन्ये पुनराचार्याः पित्तावसानमुत्कृष्टं वमनमाहुः ।—अ०१८

१०. तथा च श्रीमत्संग्रहग्रंथः ।"
११. एवं दोषक्रमेणैवान्ये चिकित्सकाश्चरकाचार्यमतानुसारिणः वस्तित्रितय-मिच्छन्ति अन्ये पुनराचार्या·····इच्छन्ति ।—अ०१९
१२. उक्तं हि सौश्रुते—शल्यं हिंसायां धातुस्तस्य शल्यमिति रूपं भवतीति ।—अ०२८
१३. अथातः शारीरिकर्मविधिमध्यायं व्याख्यास्यामः—अ० ३०

शारीरस्थान

१४. विदध्यान्मयि सान्निध्यं स देवः कलमाननः ।
यस्यानुग्रहमात्रेण जायन्ते सर्वसंपदः ।।—अ०१
१५. शास्त्रमर्म भुक्त्वा मौहूर्तिकाज्ञया तदनुमते राशिभागे···शयनमारोहेत् ।।—अ०१
१६. तथा च संग्रहे-पुरुषानभिलाषिणी च सा पुत्रं सूत इति ।"
१७. तयोश्च क्रमयोगपक्षं यथासंभवं व्याख्येयम् ।"
१८ तथा चाचार्य एव संग्रहेऽप्युक्तवान् पंचकोलचूर्णेनाहः परिणामपायिनीं····· पाययेदिति ।"
१९. तथा च संग्रहे ।"
२०. आचार्याः शोकादिभिः भाष्यातिश्रमाद्वैतोर्वा·····इत्याहुः ।—अ०२
२१. ग्रहण्याख्या पित्तधरा नाम कलामर्यादा अग्न्यधिष्ठानमिति धन्वन्तरिवचनेन धान्वन्तरसिद्धान्तो ऽस्याप्यनुमत स्वेति द्योत्यते ।—अ०३
२२. इहायुर्वेदे उभयेषामाचार्याणां भिन्नदर्शनम् ।"
२३. यच्चोष्मणानुबन्धं रोमकूपेभ्यो निष्पतत् स्वेदवाच्यं तदुदकमिति संग्रहे ।"
२४. अन्येषामाचार्याणां गुदो मांसमर्म इति स्मृत तेनैकादश मांसमर्माणीति ।—अ०४
२५. केचिच्चोदयन्ति दृष्टेऽपि जीवितं दृष्टमदृष्टेऽपि मरणमिति तान् प्रति चरकमतानुसारेण समर्थयति अरिष्ट इति ।—केचिदाचार्या कृष्णात्रेयादयः द्विविधारिष्टमाहुः स्थिरमस्थिरंचेति अर्थः ।—अ०५
२६. को योगः पातंजलादिशास्त्रदृष्टेन विधिना संपादितः ।"
२७. तस्य नरस्यात्रेयो धन्वन्तरिः संशयप्राप्तं जीवितं मन्यते ।"
२८. श्वपाको डोंबः ।—अ०६
२९. देवता हरिहरहिरण्यगर्भस्कन्देन्द्रायः श्वित्रादिकृताः ।"
३०. द्रविडान्धा दाक्षिणात्या जनपदं नाम ।"

निदानस्थान

३१. जयति महः करिवदनं जयति च वाणी जगत्त्रयीजननी ।
यत्पादपद्मकरुणा कवितावरुणालयोल्लसज्योत्स्ना ।—अ०१
३२. ज्वर इत्यादिना पर्यायकथनेनेतिहासरूपेण ज्वरादिरोगाणामुत्पत्तिरुच्यते ।—अ०२
३३. शास्त्रस्य भेषजस्य महेश्वरस्य ।"

३४. एतदेवै हृदि कृत्य भट्टारहरिश्चन्द्रेण—नागीकुर्वन्ति यतो न पूर्वदर्शनमात्रेणैव भिषग् चिकित्सायां प्रवर्तते।·····भट्टारकेण तु पूर्वरूपेषु सकलदोषसाधारणत्वाल्लेष्वशनस्य प्राधान्यमूलं तदनु प्रायूपाणामनन्तरं क्रमेण ज्वरस्य व्यक्तता भवेदिदि।"

३५. तथा च संग्रहे—रोहिष्यति-प्रसंगात्·····कासश्वासादय इत्यादि।—अ०५

३६. तन्नाम्नोष्णवातं वदन्त्याचार्याः।—अ०९

३७. आचार्या इदं द्विद्रोदरं नाम्ना आहुः अपरे आचार्याः द्विद्रोदरस्यैव परिस्रावीति नाम मन्यते॥—अ०१२

(एडियार मद्रास पुस्तकालयस्थ पाण्डुलिपि सं०३९बी०१९ दे ६५७ से साभार उद्धृत)

६. विजयरक्षित (१३वीं शती)

माधवनिदान-व्याख्या

१. अत्र, औषधान्नविहाराणामित्युपलक्षणं, तेन 'देशकालावपि बोद्धव्यौ। अतएव वृद्धवाग्भटेन व्याध्यादिविपरीतमभिधाय एतेन देशकालावपि व्याख्यातौ। (वृ०वा०नि०स्था०अ०१) इत्याख्यातम्। —१।९

२. तस्माद्दोषेतिकर्तव्यतोपलक्षितं व्याधिजन्मेह संप्राप्तिः; नतु केवलं जन्म। वाग्भटेन हि यथा दुष्टेन···(वा०नि०स्था०अ०१) इत्यादि वदता विशिष्टमेव व्याधिजन्म संप्राप्तिरुक्ता, तथा सति क्रियाविशेषोऽपि लभ्यते। यथा ज्वरे आमाशयदूषणाग्निहननादिबोधे लंघनपाचनस्वेदादिकरणमिति—१।१०

३. तेन सर्वज्वरे पित्ताविरोधिनी क्रिया कार्येति सिध्यति। यदुक्तं वाग्भटेनैव ऊष्मा पित्ताश्रते नास्ति ज्वरो नास्त्यूष्मणा विना। तस्मात्पित्तविरुद्धानि त्यजेत्पित्ताधिकेऽधिकम् इति (वा०वि०स्था०अ०१)। २।१

४. तच्चानवधानाद्व्याख्यातमिति, लक्ष्यते क्षवस्य स्तम्भः क्षवथोर्ग्रहः। भ्रमः प्रलापो धर्मेच्छा विलापश्चानिलज्वरे ··इति (वा०नि०स्था०अ०२)। २।९

५. चकारादन्यान्यपि च बोद्धव्यानि। यदाह वाग्भटः—तद्वच्छीतं महानिद्रा दिवा जागरणं निशि। सदा वा नैव वा निद्रा महान् स्वेदोऽति नैव वा। गीतनर्तनहास्यादिविकृतेहाप्रवर्तनम्—इति (वा०नि०स्था०अ०२)।—२।२३

६. एतच्च लक्षणं त्रयोदशसन्निपातेषु मध्ये स्वमानाद्वृद्धैर्दोषैस्तुल्यैरारब्धस्य ज्वरस्य चरकेण पठितं, श्लेष्मणैकोल्बणादीनां च द्वादशानां लक्षणं तत्रैव द्रष्टव्यम्। तथा च—काश्मीरपाठे चरकः—भ्रमः पिपासा दाहश्च गौरवं शिरसोऽतिरुक्। वातपित्तोल्बणे विद्यात्लिंगं मन्दकेऽपि ज्वरे॥ सैत्यं कासोऽरुचिस्तन्द्रापिपासादीहृद्व्यथाः। वातश्लेष्मोल्बणे व्याधौ लिंगं पित्तावरे विदुः॥ छर्दिः सैत्यं मुहुर्दाहस्तृष्णा मोहोऽस्थिवेदना। मन्दवाते व्यवस्यन्ति लिंगं पित्तकफोल्बणे। सन्ध्यस्थिशिरसां शूलं प्रलापो गौरवं भ्रमः। वातोल्बणे

स्याद्बहुघनुगे तृष्णा कण्ठास्यशुष्कता॥ रक्तविण्मूत्रता दाहः स्वेदस्तृष्णा बलक्षयः। मूर्च्छा चेति त्रिदोषे स्याल्लिंगं पित्ते गरीयसि ॥ आलस्यारुचिहृल्लासदाहवम्यरतिभ्रमैः। कफोल्बणं सन्निपातं तन्द्राकासेन चादिशेत् ॥ प्रतिश्याय छर्दिरालस्यं तन्द्रारुच्यग्निमार्दवम् ॥ हीनवाते पित्तमध्ये लिंगं श्लेष्माधिके मतम्। हारिद्रमूत्रनेत्रत्वं दाहस्तृष्णा भ्रमोऽरुचिः। हीनवाते मध्यकफे लिंगं पित्ताधिके मतम्। शिरोरुग्वेपथुश्वासप्रलापच्छर्द्यरोचकाः। हीनपित्ते मध्यकफे लिंगं वाताधिके मतम्। शीलता गौरवं तन्द्रा प्रलापोऽस्थिशिरोतिरुक्। हीनपित्ते वातमध्ये लिंगं श्लेष्माधिके विदुः। वर्चोभेदोऽग्निदौर्बल्यं तृष्णा दाहोऽरुचिर्भ्रमः। कफहीने वातमध्ये लिंगं पित्ताधिके विदुः। श्वासः कासः प्रतिश्यायो मुखशोषोऽतिपार्श्वरुक्। कफहीने पित्तमध्ये लिंगं वाताधिके मतम्" इति (च०चि०स्था०अ०३)।—२।२३

७. यथोक्तं वाग्भटेन"सश्लेष्मभेदः पवनः सामसत्यर्थसंचितम्। अभिभूयेतरं दोषमूरू वेत्प्रतिपद्यते। सक्थ्यस्थिनी प्रपूर्यान्तः श्लेष्मणा स्तिमितेन च। तदा स्तब्धौ प्रजानाति तेनोरू स्तब्धौ शीतावचेतनौ (वा०नि०स्था०अ०१५) इति।—२।२३

८. चित्तविभ्रंशो भ्रमादिः। यदाह वाग्भटः"कामाद्भ्रमोऽरुचिर्दाहो हीनिद्राधीधृतिक्षयाः (वा०नि०स्था०अ०२) इत्यादि।—२।२९

९. कोपाच्चेति चकारेण शिरोरुजं समुच्चिनोति। यदाह वाग्भटः—क्रोधात्कम्पः शिरोरुक् च प्रलापो भयशोकजः (वा०नि०स्था०२) इति।—२।२९

१०. एते च सर्व एव ज्वरा न विरुद्धाः, सर्वेषामेव मुनिप्रणीतत्वात्। यथोक्तं स्मृतिशास्त्रे—स्मृतिद्वैधं तु यत्र स्यात्तत्र धर्मावुभौ मतौ—इति। दृश्यन्ते च नानाविधा एव विषमज्वराः, एष एव न्यायश्चरकसुश्रुतयोः कुष्ठवैषम्ये वाप्यचन्त्रेण दर्शितः, न वा चिकित्साभेदोऽप्येषामुक्तः यैव तृतीयकादौ चिकित्सा सैव तद्विपर्ययेऽपीति ॥ २।६६

११. अत्र वाग्भटेन वातजस्य प्राकृतत्वप्रणयनं यत्कृतं तदन्ये नानुमन्यन्ते, दुःसाध्यत्वेन वैकृतादभिन्नत्वात् ॥—२।५५

१२. सप्ताहादर्वागपि यदेतत्पाचनकषायपानमुक्तं तन्नात्युद्भूतसामतायां द्रष्टव्यम्। यदाह वाग्भटः—सप्ताहादौषधं केचिदाहुरन्ने दशाहृतः। केचिल्लघ्वन्नभुक्तस्य योज्यमामोल्बणे न तु ॥ तीव्रज्वरपरीतस्य दोषवेगोदयो यतः। दोषेऽथवाऽतिनिचिते तन्द्रास्तीमित्यकारिणि। अपच्यमानं भैषज्यं भूयो ज्वलयति ज्वरम्—इति (वा०चि०स्था०अ०१) २।६६

१३. आधानजन्मनिधनप्रक्रम्यविपत्करे। नक्षत्रे दृग्गतिरुत्पन्नः क्लेशाय मरणाय वा। ज्वरस्तु जातः षड्रात्रादश्विनीषु निवर्तते" इत्यादिना ग्रन्थेन नक्षत्रभेदेन ज्वरस्य साध्यत्वासाध्यत्वं यदभिहितं, तद्वारीतवृद्धवाग्भटयोर्द्रष्टव्यं, इह तु विस्तरभयान्न लिखितम्।—२।७३

१४. वाग्भटोऽप्याह—धातून् प्रक्षोभयन् दोषो मोक्षकाले विलीयते। ततो नरः श्वसन् स्विद्यन् कूजन्वमति चेष्टते—(वा०नि०स्था० अ०२) इति। २।४७

१५. सुश्रुतेन तु मांसांकुरत्वसाम्यात् शस्त्रक्षाराग्निसाध्यत्वाच्च तेष्वर्शःशब्द-प्रयोगः कृतः, सर्षपादिस्नेहे तैलव्यपदेशवत् सुश्रुतानुवादिनो वाग्भटस्याप्यय-मेवाभिप्राय इति ।। ५।२

१६. काश्मीरास्तु चरके—विद् श्यावा कठिना रूक्षा—इत्येव पठन्ति। अधोवायुर्न वर्तते गुदेन, प्रतिलोमगत्वात् ।।—५।२४,२७

१७. वीर्यं शक्तिः। ओजः सर्वधातुसारभूतं हृदयस्थमिति पराशरः, पराभिभवेच्छेति जेज्जटः ।।—८।१०

१८. करपादयोरित्यत्र प्राण्यंगत्वादेकवद्भावं मन्यमानः काश्मीराः—तापः पादकरस्य च' इति पठन्ति, करपादिक इति पाठान्तरम्। एतत्त्रयं प्रायो-भावित्वेन चरकेणोक्तं, तेनैकादशरूपेषु मध्येऽन्यदपि त्रयं बोद्धव्यम् ।। १०।५

१९. बिबद्धसंस्तम्भयुतं इति काश्मीराः।—१५।२

२०. रक्तमद्यविषजानां यथादोषमेतास्वन्तर्भावः सुश्रुते चैता रक्तादिजा लक्षण-चिकित्साभेदख्यापनार्थं साक्षात् पठिताः, त्रिदोषजाया दोषजास्वन्तर्भावः, इत्यभिप्रायेण भेद आचार्ययोः, संग्रहे चात्र सर्वतन्त्रस्वीकारादुभयमपि लिखितमित्यदोषः।—१७।१३

२१. ननु चरकविदेहवाग्भटादिभिश्चतुर्थो मदो न पठितस्तत्कथं सुश्रुतेन तृतीयो मद इति कृत्वा पठितः, यस्तु चरके तृतीयः स च सुश्रुतेन चतुर्थः पठित इत्यविरोधः—१८।११

२१. अष्ठीला उत्तरापथे वर्तुलः पाषाणविशेष इति जेज्जटमतानुवादी कार्तिकः। —२२।७०

२३. अधिकं समाः शतमिति पंचदिनाधिकं सविंशं वर्षशतम्। यदाह वराह आयुर्विरूपणे—समाः षष्टिर्द्विघ्ना मनुजकरिणां पंच च निशाः इत्यादि : —२३।८०

२४. उच्यते, शर्करा अश्मरीभेद एव। यथाह हडबलः—एषाश्मरी मारुतभिन्नमूर्तिः स्याच्छर्करा मूत्रपचात् क्षरन्ती (च०चि०स्था०अ०२६) इति अतोऽश्मरीजेनैव शर्कराजग्रहणमिति मन्यमानो हडबलोऽष्टाविंश्यपठत् ।। —३०।२

श्रीकण्ठदत्त (१३वीं शती)
(माधवनिदान-व्याख्या)

१. तस्माद् भाविनीं मधुमेहतामाश्रित्य सर्व एव मेहा मधुमेहशब्दव्याख्याः। उक्तं हि वाग्भटे—मधुरं यच्च मेहेषु प्रायो मध्विव मेहति। सर्वेऽपि मधुमेहाख्या माधुर्याच्च तनोरतः (वा०नि०स्था०अ०१०) इति।—३३।२९

२. अयं तु ग्रन्थिग्रन्थरके गण्डमालायामस्ति, संग्रहकारेण तु गण्डमालया सह तुल्यत्वादपच्या अपच्यामेव पठितः।—३८।१०

३, अन्ये तु मांसासृग्भ्यां षष्ठं ग्रन्थिं वदन्त एवं पठन्ति,—मांसासृजं चार्बुदलक्षणेन तुल्यं हि दृष्टं त्वथ लक्षणज्ञैः—इति। किंत्वनार्षोऽयं पाठः, भोजादिसमानतन्त्रेष्वदृष्टत्वात् ॥—३८।१६

४. विदारिका भवेद्वक्ता सर्वजा सर्वलक्षणेत्यत्र केचिदसर्वजा, असर्वलक्षणेति उभयत्रापि नञः प्रयोगमिच्छन्ति, तेनासर्वजा इति सर्वदोषैः सन्निपतितैर्न भवति, असर्वलक्षणेति सन्निपातलक्षणरहितेत्यर्थः। तेन प्रत्येकदोषद्वन्द्वजत्वेन षड्विधा सन्निपातमात्रेण न भवतीति वाक्यार्थः। किंत्वयं पक्षो यद्यभिमतः स्यादाचार्यस्य, तदा व्यक्तयर्थं षड्विधा द्व्येकदोषजा इति पदं कृतं स्यात्। —५५।२१

५. तेनात्राप्यल्पपित्तयुक्तकफवातजत्वेन सर्वजत्वं ज्ञेयम्। यथा—ज्वरयोगेनाल्पपित्तत्वम्। यदुक्तम्—ऊष्मा पित्तादृते नास्ति ज्वरो नास्त्यूष्मणा विना (वा०चि०स्था०अ०१) इति।—५५।२१

६. कराल्स्तु सुश्रुतेऽनुक्तोऽधिकः संग्रहकारेण पठितः, तेन सुश्रुतोक्तपंचदशसंख्याहानिः ॥—५६।२०

७. अत्रावकाशे हनुमोक्षः सुश्रुते दन्तदेशसामीप्याद्दन्तपीडनाच्च पठितः, स इह संग्रहकारेण मुख्यदन्तगतत्वाभावान्न पठितः पठितस्तु हनुग्रहसंज्ञया वातव्याधौ भोजवचनात्। यदुक्तं, वाताभिघाताज्जन्तोर्हि हनुसन्धिर्विमुच्यते। निरस्तजिह्वः कृच्छ्रेण भाषितं तत्र गच्छति। सम्यक् तमनिलव्याधिं हनुमोक्षं विनिर्दिशेत्—इति ॥—५६।२७

८. यद्यप्येकवृन्दः कफरक्तजः, वृन्दस्तु पित्तरक्तजः पठितः. तथा वृन्दस्यैव सतोदत्वेन वातात्मकत्वमुक्तं, तथाप्येकवृन्दस्यावस्थाविशेषत्वेन वृन्दः संगच्छत एव, यथा कामलायां तद्भिन्नहेतुलक्षणस्यापि हलीमकस्य संग्रहः यथा वातमदात्ययेन ध्वंसकविक्षेपकयोरत्यन्ताभेदोऽपि स एव स्यान्न पुनस्तेन संग्रहः, भोजेऽप्ययमेकवृन्दज एव पठितः।—५६।४७

९, शुक्तिसंज्ञः, अयं पित्तजः। अत्र वाग्भटः—पित्तं कुर्यात् सिते बिन्दूनसितश्यावपीतकान्। मलात्कादर्शतुल्यं वा सर्वं शुक्लं सदाहरुक् ॥ रोगोऽयं शुक्तिकासंज्ञः सशूकृद्भेदतृड्ज्वरः (वा०उ०त०अ०१) इति।—५९।६६

१०. अत्र सिरोत्पातसिराहर्षौ वाग्भटेन पठितौ। तथा हि—रक्तराजीनिभं शुक्ले उच्यतेऽपि सवेदनम्। अक्षोपाश्रूपदेहं च सिरोत्पातः सशोणितम्। उपेक्षितः सिरोत्पातो राजीस्ता एव वर्धयन्। कुर्यात् सास्रं सिराहर्षं तेनाक्युद्वीक्षणाक्षमम् (वा०उ०तं०अ०१०) इति ॥—५९।६९

११. कुम्भीका कच्छदेशोद्भवा दाडिमफलाकारफला लता, तद्बीजेन प्रतिमा यासां ता इत्यर्थः. अन्ते कुम्भीकबीजसदृशा इति पठन्ति, तत्र कुम्भीकः कुम्भाडुलता, तद्बीजमपि दाडिमफलबीजाकारं, तत्सदृशाः पिडका उच्यन्ते ॥—५९।७७

१२. अस्यायमर्थः प्रत्येतव्यः—यदा तदेव प्रक्लिन्नवर्त्म श्लेष्मात्मकमेव सद्वात-पित्ताभ्यां विशेषकाभ्यामुपनिरुध्यते तदा सन्निपातजं सदपरिक्लिन्नवर्त्मा-र्थान्तरमासादयत् पिल्लमित्यभिधीयते, तथा चोभयोरप्यविरोधः. उभा-भ्यामेवापरिक्लिन्नवर्त्मन एव पिल्लाख्यत्ववर्णनादिति । अयं च वाग्भटे कफोत्कलन्नाख्यतया निबद्धः ।—५९।८८

१३. कुंचनं न कस्यापि तन्त्रस्य माधवकरेण लिखितं न सौश्रुतं, तेन सुश्रुतोक्त-षट्सप्ततिसंख्या न हीयते, एवं वक्ष्यमाणेऽपि पक्ष्मशाते बोद्धव्यम् ।—५९।९६

१४. पक्ष्माशयोऽत्र पक्ष्ममूलं, शातयेदुन्मूलयेदित्यर्थः । अयं च कफपैत्तिकः, कण्डूदाहवत्त्वात् । अत्र कृच्छ्रोन्मीलनं वाग्भटः पठति—रोगान् कुर्युश्चलस्तत्र प्राप्य वर्त्माश्रयाः सिराः । सुप्तोत्थितस्य कुरुते वर्त्मस्तम्भं सवेदनम् । पांशुपूर्णाभनेत्रत्वं कृच्छ्रोन्मीलनमश्रु च । विमर्दनात् स्याच्च शमः कृच्छ्रोन्मीलं वदन्ति तम् । (वा०उ०स्था०अ०८) इति ।—५९।९९

१५. माधवकरेण तु त्रिदोषजत्वेन तदधिकम्पहनुग्रहलिंगयोगाच्च केवलवात-जादन्यतोवातादिलक्षण एवायमिति अनन्तवातोऽधिकः पठितः, भेदो हि भेदवतां कारणभेदाद्विरुद्धधर्माध्यासाच्च भवतीति ।—६०।१०

१६. एवं पंचपंचाशत् स्थावराणि विषाणि भवन्ति । एषां च व्याधपुलिन्दादिभ्यो व्यक्तिज्ञानं कर्तव्यम् ।...६९।१

१७. दुःखस्पर्शत्वं स्पर्शासहत्वम् । शूलेनोपलक्षितः, तच्च पार्श्वादौ बोध्यम् । वाग्भटेनापि पठ्यते—पार्श्वशूली (वा०नि०स्था०अ०३ इति ।—११।११

१८. ननु कासादेव क्षयो जायते तत्कथं क्षयजः कास इति ? उक्तं हि..... कासात्संजायते क्षयः—इति । उच्यते, दृष्टो हि परस्परं व्यक्तिभेदेन कार्य-कारणभावो बहुशः, यथाऽतीसारार्शोग्निमान्द्यादाविति । गात्रशूलेत्यादि श्लोकार्धस्य क्षयजकासमध्ये पाठो युक्तः प्रतिभाति, सुश्रुते क्षतजकासे पठितत्वात्, क्षयकासश्चात्र चरकसुश्रुतवाक्ये मेलयित्वा माधवकरेण लिखितः, उच्यते, स गात्रशूलेत्याद्यनन्तरं क्षयकासः सुश्रुतेन पठितः, तेन स गात्रशूले-त्यादिश्लोकार्धस्य परेण सम्बन्धनात् क्षयकासलिंगत्वमिति माधवकरस्या-भिप्रायः, एतच्चान्ये नानुमन्यन्ते, यतः क्षतकासस्यावस्थायामसाध्यत्वख्या-पनपरमेतद्व्याख्यातं जेज्जटेन, गयदासेनापि क्षतजकासरूपत्वेनेति ।

—११।१२

(वृन्दमाधव-व्याख्या)

१. सामदोषादिस्वरूपनिरूपणे श्रीवाग्भटाचार्यं :—"ऊष्मणोऽल्पबलत्वेन धातुमाश्रमप्राप्तितम् ।.....सामा इत्युपदिश्यन्ते ये च रोगास्तदुद्भवाः ।—१।२५

२. श्रीमाधवोऽप्याह—लंघनं तद् द्विधा ज्ञेयं शमनं शोधनं च तत्.....शमनं लंघनं कुर्यात् कफे रक्षन् बलादिकम् ।—१।२५

३. वृत्तवैद्यव्यवहारोद्भटव्याख्यातो वृन्देन श्लोकं कृत्वा लिखितः ।—१।४९

४. अत्र हेमाद्रिव्याख्यानम् कर्षार्धमित्यादि ।—१।५२

५. एवंगुणमप्युष्णोदकं ज्वरेऽल्पं देयमित्याचार्याः ।—१।५३

६. दृढबलस्तु समाद्धाति-विरुद्धैरपि न त्वेतैःगुणैर्भ्नन्ति परस्परम् ।—१।१४०

७. यत्तु त्रतुर्जातककर्पूरकङ्कोलागुरुसिल्हकम् । लवंगसहितं चैव सर्वगन्धं विनिर्दिशेत् ॥ इति निघण्टुकारवचनं क्वचिच्छ्रूयते तदुद्वर्त्तनादिविषयं ज्ञेयम् ॥—१।२०१

७. पंचविधं ज्वरमिति प्रलेपकवर्जं सन्ततसतनान्येद्युष्कतृतीयकचतुर्थकम् । यतश्चरकस्यैते पंच योगाः । तत्रैतत्पंचकमेव पठित्वाऽमी योगा उक्ताः । संग्रहकारस्तु सततान्येद्युष्कत्र्याख्यचतुर्थकप्रलेपकान् पठित्वा योगानिमाँल्लिखितवानिति न मनोहरम् ।—१।२२५

९. ज्वरातिसारमेलकश्च ज्वरातीसाराभ्यामनन्यत्वात् माधवकरेण निदानसंग्रहे पृथक् न दर्शितः । चिकित्साविशेषं तु वक्तुं वृन्दः पृथगमुं कल्पितवान् ।—२।१

१० दशमूलीरसश्चतुर्गण इति जेज्जटमतानुयायिनां पन्थाः ।—४।३५

११. यदाह वाग्भटः—'पक्वजम्ब्वसितं क्षस्तं सम्यग्दग्धं विपर्यये.....गुदे विशेषाद् विण्मूत्रसंरोधो वाऽतिवर्तनम् ।—५।११९

१२. चक्रस्तूष्णवीर्यायां अपि गुडूच्या आचार्यपाठानुरोधाद् द्रव्यान्तरसंयोगमहिम्ना दाहप्रशमकत्वमिच्छति । (न) त्वनु टीकाकारहरिश्चन्द्रवचसा महर्षिवचनं बाधामर्हति ।—५।१२१

१३. युक्तश्चायं पक्षो नागार्जुनयोगसंवादात् ।—६।१४

१४ अतश्च रसस्य रुधिरादिहेतोरसम्यक्परिपाक इत्यर्थः इत्यरुणचन्द्रनन्दनौ । हेमाद्रिस्तु व्याख्याति रसशेष इति ।'—६।१९

१५. तथा च वाग्भटः शयीत किंचिदेवात्र इति । अस्य व्याख्या तत्र रसशेषं किंचिदेव मुहूर्त्तमेव स्वप्यात् नाजीर्णं इव प्रभूतम् इत्यरुणदत्तहेमाद्री ।—६।१९

१६. तेनेह द्विहरीतकीभक्षणात् सिद्धं तावत् गुडात् पलं भक्ष्यमिति योगव्याख्यायां माधवकराचार्यः ।—१०।१५

१७. आढकं द्रव्यचूर्णानामासुतं सलिलाढके । अहोरात्रस्थितं कुर्यात् स्वरसं क्वरसेऽसति ॥ इति हेमाद्रौ ।—१३।८

१८. तथा च नागार्जुनवार्त्तामालायां पठ्यते—
छिन्नरुहायाः क्वाथं सुशीतलं यो नरः पिबेन्मधुना ।
छर्दिं स वातपित्तश्लेष्मसमुत्थां निवारयति ॥—१५।१५
१९. अयं चार्थो जेज्जटादिभिर्व्याख्यातः प्रायो बकुलकारेण श्लोकैर्निबद्धः ।२०।२७
२०. वाग्भटे नागरस्थाने पिप्पली दृश्यते ।—२६।३९
२१. यस्य तन्त्रस्यायं प्रयोगस्तत्तन्त्रोक्तहिंग्वाद्यपरिज्ञानाद् वक्ष्यमाणो हिंग्वादिरनन्तरपठितत्वात् संग्रहकारस्याभिमतो लक्ष्यते ॥३०।३२
२२. एष योगो वाग्भटेऽधिकत्रिवृद्दन्तीयोगात् पठितस्तद्यथा—३०।३३
२३. शिलामधुकबीजैरित्यत्र बीजपदमिन्दीवरेण संबन्धनीयं न तु बीजो बीजकः पीतशालो वाग्भट-संवादात् ।—३४।१७
२४. अपच्या सह तुल्यक्रियत्वाद् ग्रन्थेरर्थस्य चान्द्रावपचीग्रन्थमेव ग्रन्थो लिखितवान् संग्रहकारकः ।—४१।३३
२५. वाग्भटेन चोभयत्रापि व्यधो दर्शितः ।—४१।४९
२६. वाग्भटेऽप्युक्तम्-वचा हरीतकी लाक्षा कटुचन्दनरोहिणी-इति ।४१।५४
२७. लशुनालेपविधानं प्रागपि लिखितत्वात् पुनरुक्तं संग्रहकारस्य श्लोकपूर्णतानुरोधादपुनरुक्तमिति चेत् । श्लोकार्धेनापि व्यवहारदर्शनात् ।४४।४६
२८. हस्तिदन्तमषीरसांजनाभ्यां लेपः । तैलेन वाग्भटे ।.....तथा च वाग्भटः ...५७।८४
२९. वाग्भटेऽप्ययः शब्दः पठितः ।—५८।६६
३०. वाग्भटेऽप्येतैः सिद्धं क्षीरं प्रतिपादितम् ।—६५।६
३१. वृष्यादिद्रव्याणां सद्यः शुक्रादिकरणे प्रभावोऽयम् । तथा च वाग्भटः ।७०।१
३२. स नर इत्यस्य स्थाने ससितानिति पाठो वाग्भटे । ७०।६
३३. अत्रार्थे च वृद्धवाग्भटः ।—७१।३
३४. तथा श्रीवाग्भटेनापि कर्मकालयोगबस्तयोऽभिहिताः ।—७६।१०
३५. वृद्धवाग्भटस्वाह ।—७६।१४
२६. तथा च वाग्भटः ।—७७।९
३७. तथा च वृद्धवाग्भट एव ।—७८।७
३८. तथा च वृद्धवाग्भटः ।—७८।४
३९. श्रीमन्माधवः प्राह ।—८१।३
४०. यदाह कपिलबलः ।—८१।४६
४१. कर्णपूरणकालस्य संख्या वाग्भटः प्राह ।—८१।८०
४२. बदरं ब्रंक्षणश्चेति संज्ञाद्वयं वाग्भटाज्ज्ञेयम् ।—८२।२०

४३. अस्य व्याख्याऽरुणदत्तहेमाद्रिभ्यां सुस्पष्टं कृत्वोक्ता ।—८२।२५

४४. अनिर्दिष्टाप्रसिद्धेषु मूलं ग्राह्यं त्वगादिष्विति संग्रहवचनात् ।८२।२५

४५. शाणमानं च संग्रहोक्तम् ।

संग्रहे धरणं तु पलस्य दशमो भागः ।८२।२७

४६. लवणस्य तदभावादयोनित्वमिति हेमाद्रिः ।८२।२७

४७. स्वरसादीनां लक्षणं वाग्भटादाह ।

संग्रहे तु उपलदशनादिपिष्टस्तु कल्कः ।—८२।२७

४८. श्रीकण्ठदत्तभिषजा ग्रन्थविस्तरभीरुणा । टीकायां कुसुमावल्यां व्याख्या मुक्ता क्वचित् क्वचित् रत्नं नागरवंशस्य भिषग् भाभल्लनन्दनः। नारायणो द्विजवरो भिषजां हितकाम्यया ।। भाष्याणि डल्लणादीनि बहुशो वीक्ष्य यत्नतः ।

टीकापूर्तिं व्यधात् सम्यक् तेन नन्दन्तु साधवः ।।—

८. हेमाद्रि (१३-१४वीं शती)

(अष्टांगहृदय-व्याख्या)

१. हेमाद्रिणा चतुर्वर्गचिन्तामणिविधायिना ।

तदुक्तव्रतदानादिसिद्ध्यंगारोग्यसिद्धये ।। २ ।।

श्रियतेऽष्टांगहृदयस्यायुर्वेदस्य सुग्रहा ।

टीका चरकहारीतसुश्रुतादिमतानुगा ।. ३ ।।

चरके हरिचन्द्राद्यैः सुश्रुते जेज्जटादिभिः ।

टीकाकारैर्न निर्णीतमिह हेमाद्रिणोदितम् ।। ४ ।।

देशभ्रंशभयाद्विचाल्य लयिनः स्नेहैः प्रतापैः परं

प्रद्राव्य प्रसृतान् प्रवेश्य परितो दुर्गोदरं द्राक्ततः ।
ऊर्ध्वाधोगति निर्गमय्य मदनैर्दन्त्यादिभिर्विद्विषो

दोषानद्रढि रामराज्यमगदांकारेण हेमाद्रिणा ।। ५ ।।

हेमाद्रिर्नाम रामस्य राज्ञः श्रीकरणेष्वधि ।

ननुभौ भगवन्निष्ठाषाड्गुण्यकारणेष्वधि ।। ६ ।।
सर्वेषां द्वीपवर्षाणां मेरुरुत्तरतः स्थितः ।

तदस्तु सर्वोत्तरता हैमाद्रौ दृश्यते यतः ।। ७ ।।
सेव्या हेमाद्रिटीकेयमायुर्वेदरसायनम् ।
आयुर्वेदात्मनां पुंसां निर्दोषत्वं हि नान्यथा ।। ८ ।।
अष्टांगहृदयं मुख्यमनुक्तेऽष्टांगसंग्रहः ।

तत्रान्तराणि चोक्तानि वैषम्ये विवृतानि च ।। ९ ।।

आयुर्वेदं व्याचिख्यासुः श्रीवाग्भटाचार्यः प्रथमश्लोकेनेष्टदेवतां नमस्करोति—रागादिरोगानिति । स चापूर्ववैद्यः । अपूर्वत्वं च अद्भुतशक्तित्वम् तच्च ज्वरादिविलक्षणानां रोगाणां घातेन ।। अ० हृ०.सू० १।१

२. उक्तं हि संग्रहे (सू० अ०३)—अणुतैलं ततो नस्यं ततो गण्डूषधारणम् । घनोन्नतप्रसन्नत्वक्स्कन्धग्रीवास्यवक्षसः ।। सुगन्धिवदनाः स्निग्धनिस्वना विमलेन्द्रियाः । निर्वलीपलितव्यंगा भवेयुर्नस्यशीलिनः इति । सू० २।७

३. संग्रहे तु (सू०अ ४) मासराशिस्वरूपाख्यमृतोर्वल्लक्षणत्रयम् । यथोत्तरं भजेच्चर्या तत्र तस्य बलादिति इति । मासलक्षणाद्राशिलक्षणं बलवत्, अतो राशिलक्षणमेवांगीकृतम्, स्वरूपलक्षणस्य ऋतुविपर्ययपर्यवसानात् । उक्तं हि तत्रैव (संग्रहे सू०अ० ४) ऋतुष्वेवंविधेष्वेव विधिः स्वास्थ्याय देहिनाम् । निर्दिश्यतेऽन्यरूपेषु विरुद्धज्ञानिकोविधिः ।। इति । तस्माच्छिशिरषट्कप्रावृट्षट्कयोः संज्ञामात्रेणैव भेदः । सू० ३।२

४. एवमेव संग्रहे (सू० अ० ७) । तस्मात्कोऽत्र क्रमः? उच्यते । इह रक्तशालिशब्देन मृदुमधुरस्निग्धसुरभिशुक्लविशदस्थूलायतत्वादीनां लोकप्रसिद्धानां स्वगुणानामुत्कर्ष उपलक्ष्यते । तेषु यथा यथा समुत्कर्षस्त उत्तमाः । यथा यथा अपकर्षस्ते हीनाः । उपलक्षणानि पुनर्वक्तुर्विवक्षाभेदाद्भिन्नानि । यानेव गुणान् सुश्रुतखारणादौ कलमशब्देनोपलक्षयतः तानेव चरकवाग्भटौ महाशालिशब्देन । ननु, सम्बन्धं विना नोपलक्षणत्वम्, न च कलमस्य महाशालिगुणैर्महाशालेर्वा कलमगुणैः कदाचित्सम्बन्धः । मैवम् । यदा कलमो महाशालिक्षेत्रे निष्पद्यते, तदा तयोस्तुल्यगुणत्वात्। स्वक्षेत्रजादेव महाशालेः स्वक्षेत्रज एव कलमो हीनः । एवमितरेष्वपि वाच्यम् । तस्मात्सर्वमेव प्रमाणम् उक्तप्रकारेणाविरोधात् । —सू० ६।५

५. माधवकरोऽप्याह-पटोलपत्रं पित्तघ्नं वल्ली चास्य कफापहा ।
फलं त्रिदोषशमनं मूलं तस्य विरेचनम् ।।—सू० ६।७८

६. उक्तं च माधवकरेण—सा पित्तशमनी पूर्वं दर्शिता वीर्यवादिना ।
शास्त्रकारेण निर्दिष्टा सा सत्यं पित्तकोपिनी ।।
यद्वाऽऽर्द्रा पित्तशमनी शुष्का पित्तप्रकोपिणी ।। इति । सू० ६।१६०

७. मद्यादीनां विरोधमाह—मधुमैरेयेति । मधु—क्षौद्रम्, माक्षीकम् इत्यरुणदत्तः । मैरेयो—धान्यासवः इति चन्द्रनन्दनः, खूर्जरासवः इत्यरुणदत्तः इन्दुश्च। मैरेयो-धातुकीपुष्पगुडधात्र्यक्षसंहितः इति माधवकरः । आसवस्य सुरायाश्च द्वयोरप्येकभाजने। सन्धानं तद्विजानीयान्मैरेयमुभयात्मकम् ।। इति जेज्जटो ब्रह्मदेवश्च । पैष्टीगुडासवमधुभिः पैष्टीमध्वाससगुडैर्वा त्रियोनिः—मैरेयः इति डल्हणः । सर्वमेतत्प्रमाणम् सर्वेषामाप्तत्वात् शंक्यमानस्यापि विरोधस्य परिहरणीयत्वाच्च । शार्करः—शर्कराकृतं मद्यम् । अत्र चकारमनुवर्त्य पद्मोत्तरिकाशाकमनुक्तमपि समुच्चेयम्, चतुर्णां संयोगस्य विरुद्धत्वात् । तथा च चरकः (सू० अ० २६।८६)—पद्मोत्तरिकाशाकं शार्करो मैरेयो मधु च सहोपयुक्तं विरुद्धं वार्ता चातिकोपयति । इति । संग्रहेऽप्येवमेवोक्तम् । पद्मोत्तरिकाशाकं-कुसुम्भशाकम्।

क्षीरेयस्य मन्थानुपानाद्विरोधमाह—मन्थानुपान इति। द्रवालोडिताः सक्तवो मन्थाः। क्षीरेयः—पायसः।—सू० ७।४०

८. सहात्मना भूतं—सात्म्यम्. आत्मनः सहायभूतमनुकूलं सुखावहमित्यर्थः। तच्च द्विविधं, कृत्रिममकृत्रिमं च। तत्र यदभ्यासेन क्रियते तत्—कृत्रिमम्। उक्तं च संग्रहे (सू० अ०) अहितान्यपि चान्येषामभ्यासादुपशेरते। इति अकृत्रिमं तु द्विविधं. निरुपाधिकं सोपाधिकं च। तत्र दोषादिनिरपेक्षं निरुपाधिकम्, तद्दोषसात्म्याख्यम्। यदाह चरकः—उपशेते यदौचित्यात्दोषसात्म्यं तदुच्यते। इति दोषादिसापेक्षं सोपाधिकम्। तत्र दोषादिविपरीतगुणत्वंउपाधिः यदाह खारणादिः—दोषप्रकृतिदेशर्तुव्याधीनां स्वगुणैः पृथक्। विपरीतगुणैः सात्म्यं तुल्यं चासात्म्यमुच्यते॥ इति॥ असात्म्यं तु—यथायथं सात्म्यविपरीतम्। तत्तु कृत्रिमं चिरपरित्यागेन क्रियते। सोपाधिके दोषादितुल्यगुणत्वं उपाधिः सात्म्यासात्म्ये एव निरुपाधिके पथ्यापथ्ये उच्येते। सोपाधिके त्वौषधानौषधे। तत्र विरुद्धभोजनस्य निरूपाधिकासात्म्यस्य कृत्रिमत्वेन सोपाधिकत्वेन वा सात्म्यत्वे सति न पीडाकारत्वम्। निरुपाधिकसोपाधिककृत्रिमाणा मुत्तरोत्तरं बलवत्त्वात्। किमत्र प्रमाणम्? इति चेत्, निरुपाधिकात्सोपाधिकं बलीय इत्यत्र तावत्संग्रहवचनं प्रमाणम् (सू० अ०९)—दोषादिवैपरीत्येन हरते रोगिणां रुजम्। ऐकध्यं दधिदुग्धादियोजना न विरुध्यते॥ इति। ताभ्यामपि कृत्रिमं बलीय इत्यत्र ऋतुचर्योक्तः ऋतुसन्धिक्रमः। तत्र हि पूर्वर्तुचर्याया उत्तरर्तुसम्बन्धात्सोपाधिकमसात्म्यत्वम्। पूर्वर्तुशीलनाच्च कृत्रिमं सात्म्यत्वम्॥ उत्तरर्तुचर्यायास्तु तत्सम्बन्धात्सोपाधिकं सात्म्यत्वम्। पूर्वर्तावशीलनाच्चेव कृत्रिममात्म्यत्वम्। तत्र कृत्रिमाभ्यां मत्वा तन्निवृत्त्यर्थमृतुसन्धिक्रम उक्तः। देशकालप्रकृतिदोषव्याधिसात्म्यानामुत्तरोत्तरं बलवत्, उत्तरोत्तरमेवान्तरंगत्वात्। अल्पहीनमात्रम्। ननु अल्पमप्यल्पां पीडां करोत्येव तत्कथं न पीडायै? सत्यम्। करोत्येव। किन्त्वसावल्पत्वेनानभिव्यक्तत्वात् सद्वदुपचर्यते, अनुदरा कन्येतिवत्। असकृदुपयुज्यमाने तु तस्मिन्नभिव्यज्यते एव। सू० ७।४७

९. पुनः पुनरुत्पादो दुष्टबुभुक्षायां भोजनात्। सा तूक्ता संग्रहे (सू० अ० ११) दोषोपनद्धम् इत्यादि (श्लो० १९ टी०)। सू० ८।२८

१०. अतएव विलम्बिकां तां भृशदुष्प्रिकित्स्याम् इति माधवकरः (मा० नि० (मा० नि० अग्निमान्द्याधौ श्लो०२१)। सू० ८।२८

११. संस्कारस्यानुवर्तनात्—यथा शीतैः संस्कृतं शीतताम्, उष्णैः संस्कृतमुष्णतां भजते इत्यादि। संग्रहे तु (सू० अ० २५)—माधुर्यादविदाहित्वाज्जन्मादेव च शीलनात्। इति। सू० १६।२

शिवदास सेन (१५ वीं शती)
(अष्टांगहृदय-तत्त्वबोध-व्याख्या)

उत्तरतन्त्र

१. मण्डूकपर्णी माण्डूकी वरमादित्यवल्यपि—१।४४

२. आन्ध्यमिति लिंगनाशताम्, उक्तं हि वृद्धवाग्भटे लिंगनाशो नीलिका पटल-मान्ध्यमिति पर्यायाः इति (उ०१७ ।अ०)—१३।२

३. उक्तं हि निघण्टौ—सिंही धावनिका क्षुद्रा बृहती कण्टकारिका—१३।५४

४. तथा रत्नप्रभायामपि गुडपाठ एव दृश्यते ।—१३।८२

५. उक्तं हि धन्वन्तरिनिघण्टौ-पृश्निपर्णी पृथक्पर्णी पर्णी क्रोष्टुकपुच्छकेति—१८।२१

६. सर्वं चेदं मध्यवाग्भटेऽप्युक्तम्–वातज ओष्ठकोपे देवदारुगुग्गुलुसर्जरसमधूच्छिष्टसिद्धेन महास्नेहेनाभ्यंगः । तेनैव समधुकचूर्णेन प्रतिसारणम् । एरण्डपल्लवैः क्षीरोत्क्वथितैः नाडीस्वेदः । खण्डोष्ठोक्तं च नावनम्, महास्नेहाक्तेन पिचुना प्रच्छादनम्, शिरोऽभ्यंगश्च ।—२१।५

७. मध्यवाग्भटेऽप्युक्तम्—क्रिमिदन्तसुषिरं स्रावयेत् मधूच्छिष्टेन सर्पिषा पूरयित्वा तप्तशलाकया दहेत् इति ।—२२।२१

८. यदाह वृद्धवाग्भटः–अधिमांसमचिरोत्थितं स्रावयेत् विवृद्धं तु वडिशेन मुचुण्ड्या वा गृहीत्वा मण्डलाग्रेण छित्त्वा तीक्ष्णैः प्रतिसारयेत् इति (उ०२६अ०) तेजोवती चवी मूर्वेत्यन्ये किन्तु चव्येव युक्ता उक्तं–वृद्धवाग्भटवचने तीक्ष्णैरित्युक्तत्वात् ।—२२।३९

९. मध्यवाग्भटेऽप्युक्तम्–उपजिह्विकां शाकपत्रेणांगुलिशस्त्रेण वा परिस्राव्य यवक्षारेण प्रतिसारयेत् इति (उ०२६अ०)—२२।४८

